International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2015; 1(7): 63-65
© 2015IJSR
www.sanskritjournal.com
Received: 07-09-2015
Accepted: 09-10-2015

कृष्ण बिश्वासः
गवेषकः, संस्कृत-पालि-प्राकृत-विभागः
विश्वभारती, शान्तिनिकेतम्

**Correspondence**
कृष्ण बिश्वासः
गवेषकः, संस्कृत-पालि-प्राकृत-विभागः
विश्वभारती, शान्तिनिकेतम्

# सखीकर्म— रसमञ्जर्य्यनुसारेण

**कृष्ण बिश्वासः**

षोडशशतकस्य आलंकारिकः भानुदत्तमिश्रः मिथिलायाः मधुवनीमण्डलान्तर्गत-सरिसवग्रामवास्तव्यः आसीत्। सः 'रसमञ्जरी' ग्रन्थस्य रचयिता। तस्य पितुर्नाम आसीत् गणपतिमिश्रः। तेन 'रसमञ्जरी' इत्याख्ये ग्रन्थे प्रचलितरीतौ नायकनायिकयोः वर्गीकरणं कृत्वा शृङ्गाररसस्य आलोचनं कृतम्। ग्रन्थेऽस्मिन् भारतीयरसतत्त्वस्य भारतीयसौन्दर्यतत्त्वेन सह महत्त्वपूर्णं सम्मेलनं कृतमस्ति। ग्रन्थस्योपरि द्वादशसंख्यकाः टीकाः उपलभ्यन्ते। तेषु प्रख्यातटीकाकारेण नागेशभट्टेनापि 'प्रकाश' नाम्नि टीका रचिता। अस्माभिः पञ्चटीकानां सहायता नीता। 'रसमञ्जरी' इत्याख्ये ग्रन्थे नायिकाभेद-नायकभेद-नायिकासहाय-नायकसहाय-शृङ्गाररसादयो विषयाः आलोचिताः। तत्र नायिकोपयोगिनीं सहचरणशीलां सखीं लक्षयति- 'विश्वासविश्रामकारिणी पार्श्वचारिणी सखी' । अनन्तरम् उदाहरणेन सखीकर्मणां निर्देशोऽपि कृतः। इत्थं रसमञ्जर्य्यनुसारेण सखीकर्म अस्माकमालोच्यविषयः।

**कुञ्जिशव्दाः** व्यज्यते, मकरिका, उपालम्भो, रोमाञ्चम्

**रसमञ्जरीकारः-** भानुदत्तमिश्रः षोडशशताव्द्यां जन्मग्रहनमकरोत्। सः मिथिलायाः मधुवनीमण्डलान्तर्गत-सरिसवग्रामवास्तव्यः आसीत्। तस्य पितुर्नाम गणपतिमिश्रः। तस्य पितामहः महादेवमिश्रः, प्रपितामहः भवनाथमिश्रश्च। 'रसमञ्जरी' नायक-नायिकाभेदविषयको ग्रन्थो अस्ति। 'रसमञ्जरी' ग्रन्थे नायिकाभेद-नायिकासहाय-नायकभेद-नायकसहाय-शृङ्गाररसादयो विषयाः आलोचिताः। इयन्तं यावत् ग्रन्थस्यास्य द्वादशसंख्यकाः टीकाः प्राप्यन्ते। यथा अनन्तपण्डितस्य 'व्यङ्ग्यार्थकौमुदी' , विश्वेश्वरपण्डितस्य 'समञ्जसा' , नागेशभट्टस्य 'प्रकाशः' प्रभृतयः। तेषु पञ्चटीकानां सहायता अस्माभिः नीता। भानुदत्तमिश्रः रसमञ्जर्य्यां भारतीयसौन्दर्यतत्त्वस्य गभीरम् उन्मेषं विदधाति। तत्र रसमञ्जर्य्यनुसारेण सखीकर्म अस्माकमालोच्यविषयः।

नायिकाभेदप्रदर्शनादनन्तरं नायिकासहायाः निरूपिताः। रसमञ्जर्य्यां नायिकोपयोगिन्योः सखीदूत्योरभ्यर्हितत्वेन सखीमादौ लक्षयति। परन्तु विश्वनाथादयः केचिदालंकारिकाः सखीं दूत्यामेव अन्तर्भावमाहुः। यद्यपि सखी दौत्यकार्यं करोति, अतः साऽपि दूती भवितुमर्हति, परन्तु रसमञ्जर्य्यां पृथकत्वेन सखीलक्षणं प्रदर्शितम्। तत्र नायिकोपयोगिनीं सहचरणशीलां सखीं लक्षयति ग्रन्थकारः- "विश्वासविश्रामकारिणी पार्श्वचारिणी सखी।" [1] विश्वासश्च विश्रामश्च तौ कारयतीति विश्वासविश्रामकारिणी विश्रम्भनिवृत्तिसहायिका पार्श्वचारिणी सहचरणशीला सखी इत्यर्थः।

ग्रन्थेऽस्मिन् सखीकर्मणां निर्देशोऽपि कृतः। सख्याः मण्डणोपालम्भ-शिक्षा-परिहास-प्रभृतीनि कर्माणि सन्ति। सखीजनकर्मकथनप्रसङ्गे मधुसूदनकवीन्द्रविरचितायां रसचन्द्रिकायामपि दृश्यते-

"शिक्षा-विनयमानना अपि मिलननेपथ्यकरणानि।
क्रोधोदितमनुयोगो रतिरपि तासामयं व्यवहारः।।" [2]

एतेषु मण्डमलंकरणं नायिकायाः प्रसाधनमिति। मण्डणमुखेन सख्याः उदाहरणं प्रदर्शितम् भानुदत्तमिश्रेण-

---

1 रसमञ्जरी, भानुदत्तः, सम्पा, गोपालशास्त्री नेने, पृष्ठा- २६२

2 रसचन्द्रिका, मधुसूदनकवीन्द्रः, पृष्ठा- १७३

"स्तनकनकमहीधरोपकण्ठे
प्रियकरपल्लवमुल्लसत्प्रमोदम्।
रहसि मकरिकामिषाल्लिखन्तीं
कमलमुखी कमलैः सखीं जघान।।" [3]

प्रसाधनसमये काचित् सखी एकान्ते नायिकायाः स्तनरूपी-सुवर्णपर्वतटे मकरिकानिर्माणछलनया नायकस्य रोमाञ्चपूर्णस्य पाणिपल्लवस्य चित्राङ्कनं करोति, तदा कमलवदना सा नायिका तां सखीं करस्थितैः लीलापद्मैः ताडयामास। कामदेवस्य ध्वजायां मकरस्याकृतिः चित्रिता। तस्मात् मकरिकाङ्कनस्य प्रथा प्रचलति। 'समञ्जसा' टीकानुसारेण 'मकरिकाः स्तनस्योपरि नानाकाराः पत्रावल्ल्यः' इति। अत्र नायिकास्तनस्योपमा सुवर्णपर्वतेन सह प्रदीयते, तस्माद् औन्नत्यं गौरिमा च व्यज्येते। अपि च उपकण्ठपदं नायककरस्पर्शयोग्यत्वं ध्वनयति। इन्द्रदत्तकृतायां 'रसमञ्जरी'टीकायां दृश्यते- 'इह कनकत्वेन गौरत्वं महीधरत्वेनोतुङ्गत्वं काठिन्यं च प्रियत्वेन लेखनौचिती च ध्वन्यते विश्रामादि च व्यक्तम्।' [4] उक्तं च 'प्रकाश' टीकायां नागेशभट्टेन- 'कनकत्वेन गौरता महीधरत्वेन काठिन्योत्तुङ्गते। उपकण्ठपदेन उपरि नायककरस्पर्शयोग्यता ध्वन्यते। मकरिकापत्रावली उल्लसत्प्रमोदं कुचस्पर्शेन सरोमाञ्चमित्यर्थः।' वस्तुतः अत्र सखी नायिकाम् अलंकरोति। एवंरूपेण नान्दनिकमहत्त्वम् अन्विष्य ग्रन्थकारेण उदाहरणनिर्माणं कृतमिति।

उपालम्भो भवति आक्षेपवचनम् अर्थात् अनुचिताचारे भर्त्सनम्। उपालम्भद्वारा सखीम् उदाहर्तुमाह-

"सान्द्रध्वानैर्मुखरितदिशस्श्रेणयस्तोयदानां
धारासारैर्धरणिवलयं सर्वतः प्लावयन्ति।
तेन स्नेहं वहति विपुलं मत्सखी युक्तमेव
त्वं निःस्नेहो यदसि तदिदं नाथ! मे विस्मयाय।।" [5]

दूत्यदशायां नायकं प्रति सख्या सनिन्दवचनमिदम्। सख्या उक्तिः- हे प्रभो! गम्भीरगर्जनैः सशब्दीकृताः दिशः आशाः याभिः ताः मेघानां पङ्क्तयः अविरलवर्षणैः भूवलयं सर्वतः जलमग्नं कुर्वन्ति। तेन कारणेन अर्थात् एतादृशे वर्षागमे मत्सखी मम वयस्या नायिका सातिशयं प्रेम धारयति। तत् युक्तमेव उचितमेव भावः। किन्तु त्वं स्नेहरहितः वर्तसे, तव ईदृशं स्नेहहीनत्वं मम कौतूहलाय वर्तते। एतद् आश्चर्यमिति भावः। वर्षागमे प्रणयिनां स्नेहः समुचित इति। सख्याः नायकं प्रति एतादृशे आक्षेपवचने कालिदासस्य उक्तिः स्मरणीया-

"मेघालोके भवति सुखिनोऽप्यन्यथावृत्तिः चेतः।
कण्ठाश्लेषप्रणयिनिजने किं पुनर्दूरसंस्थे।।" [6]

वस्तुतः अत्र नायिकायाः स्नेहवहनेन स्वभावसारल्यं प्रियागमननिश्चयश्च ध्वन्येते। तथा नायकस्य प्रेमाभावेन हृदयकाठिन्यं सख्युपालम्भौचिती च व्यज्येते। श्लोके प्रयुक्तं नाथपदं स्वेच्छाकार्यकारित्वं व्यञ्जयति। श्लोकेऽस्मिन् विशेषोक्तिरलंकारः 'विशेषोक्तिरखण्डेषु कारणेषु फलावचः' इत्यादि लक्षणसमन्वयात्। प्रसङ्गतः उल्लेख्यम् आचार्यधनिकेनापि दशरूपकस्य अवलोकवृत्तौ सख्या आक्षेपवचनस्योदाहरणं 'मालतीमाधवाद्' उद्धृतम्-

"सत्यं जानाति द्रष्टुं सदृशे जने युज्यते रागः।
म्रियतां न त्वां भणिष्यामि मरणमपि श्लाघनीयमस्याः।।" [7]

शिक्षा हिताहितप्रवृत्तिनिवृत्त्युपदेशः। शिक्षामुखेन सख्याः उदाहरणम्-

"सानन्दमालि! वनमालिविलोकनाय
निर्गच्छ कुञ्जमिति किन्तु विचारयेथाः।
झङ्कारिणो मधुलिहो दिवसे भ्रमन्ति
रात्रौ पुनश्चपलचञ्चुपुटाश्चकोराः।।" [8]

काचित् सखी श्रीकृष्णम् अभिसरन्तीं श्रीराधां कथयति- हे सखे राधे! वनमालिनः श्रीकृष्णदर्शनाय निःशङ्कं कुञ्जं प्रयाहि। किन्तु विचारं कुर्याः। यतः अहनि शब्दायमानाः द्विरेफाः विचरन्ति, अन्यच्च निशायां चञ्चलचञ्चुपुटसमन्विताः चकोराः सञ्चरन्ति। वस्तुतः दिवसे मुखरदुर्जनाः, अपि च रात्रौ नैशवृत्तान्तसूचकाः पिशुनाः जनाः भ्रमन्ति। अतः इदं द्वयं विचिन्त्य त्वया गन्तव्यम्। 'व्यङ्ग्यार्थकौमुदी' टीकानुसारेणात्र 'कुञ्ज' शब्दस्यार्थः भवति लतापिहितप्रदेशः। श्लोकेऽस्मिन् निभृताभिसारस्य वार्ता व्यज्यते। 'सुरभी' टीकानुसारेण- 'त्वन्मुखामोदलुब्धभ्रमरझङ्कारैर्दिने; त्वद्वदनेन्दुकान्तिपिपासुचकोरचटुलचञ्चुरवैर्निशि च लोकास्त्वां ज्ञास्यन्तीति नाभिसरणीयम्।' [9] 'रसमञ्जरी' टीकायामपि उक्तम्-'तस्मात्तथागन्तव्यं यथाऽन्यो न जानीयादिति शिक्षा।' [10] नागेशभट्टेनापि इत्थमुवाच- 'एवं च तथा गन्तव्यं यथा केनापि न ज्ञायत इति व्यज्यते।' [11] उदाहरणे मधुलिट्चकोरशब्दाभ्यां वाच्यावाच्यविवेकशून्याः मुखरदुर्जनाः पिशुनाश्च; गीतिरताः प्रियाधरपिपासवश्च तरुणाः वा, अपि च लोकावगमसम्भवत्वमपि ध्वन्यन्ते। अस्मिन् श्लोके प्रकृताप्रकृतानां भ्रमरचकोराणां भ्रमररूपैकधर्मसम्बन्धात् 'प्रकृतानामप्रकृतानाञ्चैकसाधारणधर्मान्वयो दीपकम्।' इति जगन्नाथलक्षितं दीपकमलंकारः।

परिहासः नर्मवचः। परिहासः त्रिविधः- सखीकृतः, नायककृतः नायिकाकृतश्च। सखीकृतपरिहासस्य निदर्शनं यथा-

"आगारभित्तिलिखितासु निवेदयस्व
कः सप्तमो दशसु मूर्त्तिषु लोकभर्तुः।
इत्थं सखीजनवचः प्रतिपद्य सद्यः
सीता स्मितद्युतिभिरुत्तरयाञ्चकार।।" [12]

काचित् सखी जानकीं प्रति कथयति- हे सीते! भवनस्य कुड्ये चित्रितासु विष्णोः मीनादिदशावताररूपासु मूर्त्तिषु सप्तमोऽवतारः कः किं नाम इति कथय तन्नामोच्चारय। एवं सहचरीवाक्यानि श्रुत्वा वैदेही सीता सपदि हास्यदीप्तिभिः न तु वाक्यैः प्रतिवचनमकरोत्। श्लोकस्यास्य व्याख्यायां नागेशेनोक्तम्- 'अत्र लोकभर्तृत्वेन लज्जाहेत्वभावः। सखीजनत्वेनाऽवश्योत्तरदानार्हता। अत्र हि तथाहसितेन मत्प्रियनामाऽयमित्युत्तरितमिति भावः।' [13] श्लोकेऽस्मिन् अतिशयोक्तिरलंकारः 'सिद्धत्वेऽध्यवसायस्यातिशयोक्तिर्निगद्यते' इत्यादि लक्षणसमन्वयात्। अत्र स्वीयपुरुषनामग्रहणदोषात् लज्जातिशयाच्च परिहासः। अस्यानुरूपो भावो यथा 'कुमारसम्भवे' -

"पत्युः शिरश्चन्द्रकलामनेन स्पृशेति सख्या परिहासपूर्वम्।
सा रञ्जयित्वा चरणौ कृताशीर्माल्येन तां निर्वचनं जघान।।" [14]

---

[3] रसमञ्जरी, भानुदत्तः, सम्पा, गोपालशास्त्री नेने, पृष्ठा- २६३
[4] रसमञ्जरी, भानुदत्तः, सम्पा, रमेशचन्द्र होता, पृष्ठा- ८५
[5] रसमञ्जरी, भानुदत्तः, सम्पा, गोपालशास्त्री नेने, पृष्ठा- २६४
[6] मेघदूतम्, कालिदासः, पृष्ठा- १०१
[7] दशरूपक, धनञ्जय, पृष्ठा- २१२
[8] रसमञ्जरी, भानुदत्तः, सम्पा, गोपालशास्त्री नेने, पृष्ठा- २६५
[9] तदेव, पृष्ठा- २६६
[10] रसमञ्जरी, भानुदत्तः, सम्पा, रमेशचन्द्र होता, पृष्ठा- ८६
[11] रसमञ्जरी, भानुदत्तः, सम्पा, रामशास्त्री तैलङ्ग, पृष्ठा- १९९
[12] रसमञ्जरी, भानुदत्तः, सम्पा, गोपालशास्त्री नेने, पृष्ठा- २६७
[13] रसमञ्जरी, भानुदत्तः, सम्पा, रामशास्त्री तैलङ्ग, पृष्ठा- २००
[14] रसमञ्जरी, भानुदत्तः, सम्पा, गोपालशास्त्री नेने, पृष्ठा- २६८

अनेन प्रकारेण सखीकर्मणां निर्देशावसरे यानि उदाहरणानि प्रदर्शितानि, तत्र व्यञ्जनया विविधाः वैचित्र्यपूर्णाः अर्थाः प्रकटिताः। अपि च श्लोकेषु विविधाः अलंकाराः प्रयुक्ताः। परिशेषे एतद् वक्तुं शक्यते यत्- रसमञ्जरीकारेण सखीकर्मविषये यानि उदाहरणानि प्रदर्शितानि, तानि ग्रन्थकारस्य स्वकीयानि सर्जनानि। न केवलं सखीकर्मविषये, अपि तु समग्रग्रन्थेषु विविधविषयेषु भानुदत्तमिश्रस्य दक्षता प्रकाशिता। अतः उदाहरणनिर्माणे लक्ष्यलक्षणसमन्वये च 'रसमञ्जरी' ग्रन्थस्य स्वातन्त्र्यं परिलक्ष्यते। अपि च ग्रन्थेऽस्मिन् भारतीयरसतत्त्वस्य भारतीयसौन्दर्यतत्त्वस्य वा समञ्जसाभिव्यक्तिर्नितरां लक्षणीया इति दिक्।

**सन्दर्भग्रन्थाः**


1. रसमञ्जरी- भानुदत्तः, सम्पा. गोपालशास्त्री नेने। वाराणसी; श्रीहरिकृष्णनिवन्धभवनम्, १९७८।
2. रसमञ्जरी- भानुदत्तः, सम्पा. रमेशचन्द्र होता। इलाहावाद; गङ्गानाथ झा-केन्द्रीय-संस्कृत-विद्यापीठम्,२००२।
3. रसमञ्जरी- भानुदत्तः, सम्पा. जनर्दनपाण्डेयः। वाराणसी; सम्पूर्णानन्द संस्कृतविश्वविद्यालयः, १९९१।
4. रसमञ्जरी- भानुदत्तः, सम्पा. रामशास्त्री तैलङ्ग। वेणारस; वेणारस संस्कृतसिरिज, १९०४।
5. रसमञ्जरी- भानुदत्तः, सम्पा. जमुनापाठक। वाराणसी; चौखम्बा विद्याभवन, २०११।
6. साहित्यदर्पणः- विश्वनाथः, सम्पा. विमलाकान्तमुखोपाध्याय। कलिकाता; संस्कृतपुस्तकभाण्डार, २०१३।
7. दशरूपक- धनञ्जय, सम्पा. सीतानाथ आचार्य। कलिकाता; संस्कृतपुस्तकभाण्डार, २०१२।
8. मेघदूत ओ सौदामनी- कालिदासः, सम्पा. सत्यनारायणचक्रवर्ती। कलकाता; संस्कृतपुस्तकभाण्डार, २०१३।
9. रसचन्द्रिका- मधुसूदनकवीन्द्र, सम्पा. शिवनारायणशास्त्री। शान्तिनिकेतन; विश्वभारती, १९६९।